प्रतिग्रहीतृकुले च पिण्डान्वयेन त्रिपौरुषं यदाह कार्ष्णाजिनिः "यावन्तः पितृवर्गाः स्युस्तावद्भिर्दत्तकादयः। प्रेतानां योजनं कुर्य्युः स्वकीयैः पितृभिः सह। द्वाभ्यां सहाथ तत् पुत्राः पौत्रास्त्वेकेन तत्समम्। चतुर्थे पुरुषे च्छेदं तस्मादेषा त्रिपौरुषीति"। अस्यार्थः दत्तकादयः पुत्राः प्रेतानां प्रतिग्रहीत्रादीनां पितृणामौरसत्वे दत्तकत्वे द्व्यामुष्यायणत्वे वा यावन्तः पितृवर्गाः त्रयः षट् वा तावद्भिः सह तेषां योजनं सपिण्डनं कुर्य्युः तत्र प्रतिग्रहीत्रादीनामौरसत्वे तत्पितृपितामहप्रपितामहास्त्रयः, दत्तकत्वे तत्प्रतिग्रहीतृपितामहप्रपितामहास्त्रयः, द्व्यामुष्यायणत्वे तज्जनकाद्यास्त्रयः तत्प्रतिग्रहीत्रादयस्त्रय इति षट्। एवञ्च दत्तकस्य स्वकर्तृके पार्वणे येषां देवतात्वं स्वपुत्त्रकर्तृके सपिण्डीकरणेऽपि तेषामेव तथात्वमिति ज्ञापितम्। दत्तकस्य पुत्त्रास्तु दत्तकसपिण्डीकरणं तत्प्रतिग्रहीत्रा तत्पितृणां त्रयाणां मध्ये द्वाभ्याञ्च सह कुर्य्युः। एवञ्च दत्तकस्य पौत्रा दत्तकप्रतिग्रहीतृभ्यां गृहीतुः पितृणां त्रयाणां मध्ये एकेन गृहीतुः पित्रेति यावत्तेन च समं सह तत् स्वपितृसपिण्डनं कुर्य्युः। चतुर्थपुरुषे च्छेदमिति। यो यदा यत् सपिण्डीकरोति स तत्पित्रादिभिस्त्रिभिरेव करोतीति चतुर्थे विरामः सिद्ध एवेति तदारम्भः "सिद्धे सत्यारम्भो नियमाय" इति न्यायेन लेपिनां लेपनिरासेन सापिण्ड्यव्यवच्छेदार्थः। तदेवाह तस्मादेषेति। एषा सपिण्डता। तथाच "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः। पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषमिति" मत्स्यपुराणोक्तसाप्तपौरुषसापिण्ड्यस्य सामान्यस्थानेन विशेषेण बाध एव। अतएव हारीतेन "लेपिनस्त्रीन् वाचक्षाणः स्या सप्तमादित्येके" इति पक्षान्तरमुपन्यस्तं सङ्गच्छते। तदेव संग्रहान्यत्रोक्तम् "दत्तकानान्तु पुत्त्राणां सापिण्ड्यं स्यात्त्रिपौरुषम्। जनकस्य कुले तद्वद्गृहीतुरिति धारणेति"। यदिदमुभयत्र त्रिपुरुषसापिण्ड्याभिधानं तत् द्व्यामुष्यायणाभिप्रायेण, तस्य त्रिकद्वयेन सपिण्डनविधानात्। शुद्धदत्तकस्य तु "गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः। गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधेति" प्रागुक्तमनुवचने पिण्डनिवृत्तिदर्शनात् प्रतिग्रहीतृकुल सापिण्ड्यमिति।" यत्तु वृद्धगौतमीयम् "सगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः। विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते"। सगोत्रेषु मध्ये कृता अपि दत्तकादयो विधिनैव गोत्रं भजन्ते परन्तु तेषु सापिण्ड्यं नोत्पद्यते सगोत्रेष्वपि सापिण्ड्यानुत्पत्तौ परगोत्रेषु सुतरां सापिण्ड्यानुत्पत्तिरिति। तत्तु पुत्रान्तरवत् साप्तपौरुषसापिण्ड्यप्रसक्तौ निषेधकं सापिण्ड्यप्रयुक्तदशाहाशौचादिप्रतिषेधकम् वा न तु सामान्यतसापिण्ड्यनिषेधमुक्तवचनजातात्।

अथ दत्तकाशौचनिर्णयः। तत्र शुद्धदत्तकस्य जनककुले परस्परमशौचं नास्त्येव गोत्रपिण्डनिवृत्त्या अशौचनिवृत्तेरर्थसिद्धत्वात् द्व्यामुष्यायणस्य तु उभयत्रैवाशौचमिति। ब्रह्मपुराणे "दत्तकश्च स्वयन्दत्तः कृत्रिमः क्रीत एव च। अपविद्धाश्च ये पुत्त्रा भरणीयाः सदैव ते। भिन्नगोत्राः पृथक् पिण्डाः पृथग्वंशकराः स्मृताः। जनने मरणे चैव त्र्यहाशौचस्य भागिनः"। पराशरः "भिन्नगोत्रः स्वगोत्रो वा नीतः संस्कृत्य चेच्छया। जनने मरणे तस्य त्र्यहाशौचं विधीयते"। तथा "औरसं वर्जयित्वा च सर्ववर्णेषु सर्वदा। क्षेत्रजादिषु पुत्रेषु जातेषु च मृतेषु च। अशौचन्तु त्रिरात्रं स्यात् समानमिति निश्चयः"। सर्वदा उपनयनानन्तरमपि। अत्र सगोत्रस्यापि विधिना जनकगोत्रविच्छित्तिपूर्वकगृहीतृगोत्रप्राप्तावसगोत्रदत्तकाविशेषात् त्र्यहाशौचमुक्तं युक्तमेव। तथा दत्तके अकृतोद्वाहे पश्चाज्जातस्यौरसस्य विवाहे न परिवेदनदोषः न वा दत्तकस्याग्रजसोदरात् पूर्वं विवाहकरणेऽपि क्षतिः। ननु शुद्धदत्तकस्य जनककुले सापिण्ड्यविच्छेदस्य दर्शितत्वात् तत्र विवाहः प्रसज्येत प्रसज्येत च द्व्यामुष्यायणस्यापि त्रिपुरुषानन्तरितकन्यासन्ततिपरम्परया विवाहः, नैवं "असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने"। मनुवचने चकारात् पितुरसपिण्डा च इति गृहीतृमातृगोत्रस्यापि दत्तकस्य जनकस्यापि सपिण्डासगोत्रावर्जनाय पितुरिति पदोपादानात्। न च तथापि दत्तकस्य पितुरपि दत्तकत्वे तत्त्रिपुरुषानन्तरितकन्यासन्ततेर्विवाहः केन वार्य्यते पितृसापिण्ड्यसगोत्रत्वयोरभावादिति वाच्यम् यतो विवाहे नैतत् सापिण्ड्यमुपयुज्यते किन्तु सर्वसाधारणं परिभाषितं पितृपक्षे साप्तपौरुषं मातामहपक्षे पाञ्च-